# संस्कृत-वार्ता:

दिनाङ्क : 13/12/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केरल स्थानीय निकाय निर्वाचने विपक्षी-दले युनाइटेड-डेमोक्रेटिक-फ्रंट-सत्तारूढ़ डेमोक्रेटिक-फ्रंट च बहुषु जनपदेषु अग्रे वर्तेते। भाजपेति दलस्य नेतृत्व युतेन एनडीए पक्षेण तिरुवनन्तपुरम् नगर निगमे महत्वपूर्णोपलब्धि: समर्जिता ।
- पश्चिम बंगाल आरक्षिबलेन अव्यवस्थाकारणात् सताद्रु दत्ता इत्यमुं निगडितम् ।
- राष्ट्रीय राजधानी-क्षेत्र दिल्ल्यां वायु-गुणवत्ता-प्रबन्धनायोगेन ग्रैप इति तृतीय चरणं समारब्धम्।
- अमरीकी राष्ट्रपते: डॉनल्ड ट्रम्पस्य थाईलैंड-कम्बोडिया-देशयोर्मध्ये संघर्ष विरामे शान्ति-सन्धरणानन्तरमपि तत्रत्य सीमायां संघर्ष: प्रचलति ।

-----------------------------------------

<u>प्रधानमन्त्री केरल स्थानीय निकाया:</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य केरल मतदातृभ्य: स्वीय-सन्तोष: प्रकटित: यत् ते केरल-स्थानीय-निकाय-निर्वाचनेषु एनडीए प्रत्याशिनाञ्कृते स्वीय मतानि प्रदत्तवन्त:। प्रधानमन्त्रिणा नरेन्द्रमोदिना समाजिक-अन्तर्जालीय-सन्देशे भणितं यत् तदीय दलं थिरुवनन्तपुरम् निगम-विकासाय कृतसंकल्पं विधते। श्रीमोदिना तत्र भारतीय-जनता-पार्टीर्ति दलस्य कार्य कर्तृभ्य: तेषां कठिन –परिश्रामाय धन्यवाद: ज्ञापित: ।

-----------------------------------------

<u>मैसी – भारत यात्रा</u>

पश्चिम-बंगाल-आरक्षिदलेन सताद्रु-दत्ता इत्यमुं निगृहीतम्। इत्येष: तत्र सॉल्ट-लेक-क्रीडा-प्राङ्गणे आयोजक: वर्तते। होराद्वयात्मकं परिपृच्छा-अनन्तरं सॉल्ट-लेक-भारती-क्रीडाङ्गणे बहु-संख्यायां प्रशंसका: प्रदर्शनं कृतवन्त: । आरक्षि-महानिदेशकेन जावेद शामीम इत्यनेन भणितं यत् प्राङ्गण-प्रदर्शनस्य प्राथमिक-अन्वेषणं प्रचल्यते। तेन प्रोक्तं यत् स्थिति: अधुना नियन्त्रणे अस्ति। तत्रत्य राज्यपालेन डॉ. सी.वी. आनन्द बोसेन निर्देश: प्रदत: यत् पश्चिम-बंगाल-प्रशासनं युवा-भारती-क्रीडांगणे-आयोजक-कर्तारं, प्रायोजिक-कर्तृणां च निगडनं सपद्येव प्रभावि- कुर्यु:।

-----------------------------------------

**मैसी-सुधांशु त्रिवेदी:**

कोलकातानगरे अर्जेण्टीना-देशस्य फुट्बाल्-क्रीडकस्य लियोनेल मेस्सी इत्यस्य कार्यक्रमावधौ टी. एम्. सी. दलस्य नेतृत्वे पश्चिमवङ्गस्य सर्वकारस्य कथितेन कुप्रबन्धनेन जना: कुपिताः इति भाजपेति दलेन अद्य आरोपितम्। नवदिल्ल्यां वार्ताहर सम्मेलनं सम्बोधयन् भाजपेति दलस्य सांसदः प्रवक्ता च डा. सुधांशु त्रिवेदिः एतत् सम्पूर्ण-देशस्य कृते लज्जास्पदं क्षणम् इति उक्तवान्। सः आरोपितवान् यत् एतादृशाः घटनाः कर्णाटक-तमिलनाडु सदृशेषु एन्. डी. ए- अशासित-राज्येषु अपि अभवन्, घटनया दुर्बला विधि-व्यवस्थायाः स्थितिः प्रतिबिम्बिता अस्ति, यत्र अधिकार-धारिणः मन्यन्ते यत् ते नियमेभ्यः उपरि सन्ति इति।

-----------------------------------------

**दिल्ली-एन्. सी. आर्.-वायुगुणवत्तायाः**

दिल्ली-एन्. सी. आर्. क्षेत्रे वायुगुणवत्तायाः निम्न स्तरे वायुगुणवत्ता प्रबन्धन-आयोगेन (सी. ए. क्यू. एम्.) इत्यनेन तत्क्षणप्रभावेन ग्रेडेड्-रिस्पान्स्-एक्शन्-प्लान् (जी. आर्. ए. पी.) इत्यस्य तृतीयं चरणं समारब्धम्। निर्णयोयं नगरे वायुगुणवत्ता सूचकाङ्कः गम्भीर-श्रेण्यानन्तरं गृहीत: । एतत् पूर्वमेव प्रवृत्तस्य जी. आर्. ए. पी. इत्यस्य प्रथम-द्वितीय-चरणयोः अन्तर्गतेषु कार्येषु अतिरिक्तम् अस्ति। प्रतिबन्धेषु अत्यावश्यक-निर्माण-विध्वंसादि कार्याणि पूर्णतया प्रतिबन्धितानि सन्ति।

-----------------------------------------

**संसद-आक्रमणम्**

दिसम्बर मासे एकाधिक-द्विसहस्रतमें वर्षे त्रयोदश-दिनांके चतुर्विंशतिः वर्षाणि पूर्वं संसदि आतंक्याक्रमणम् अभवत्। अद्य सम्पूर्ण-राष्ट्रं आक्रमणे हुतात्म-सुरक्षा- भटेभ्य: पीडितेभ्यश्च श्रद्धाकुसुमानि अर्पयति। राज्य सभाया: सभापित: सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी, केन्द्रीय मन्त्री पीयूष गोयल:, जितेन्द्र सिंह:, किरेन रिजिजू:, अर्जुन राम मेघवाल:, च हुतात्मभूतेभ्य: श्रद्धाकुसुमानि समर्पितवन्त: । लोकसभायां विपक्षि दलस्य नेतार: सांसदा: च हुतात्मभूतेभ्य: श्रद्धाञ्जलि: समर्पितवन्त:। राष्ट्रपति: द्रौपदी मुर्मु: प्रोक्तवती यत् राष्ट्रं तेषां नायकानां साहसं, वीरतां, बलिदानञ्च नमति। राष्ट्रपतिना आतंकवादं समूल-विनाशाय भारतस्य संकल्पं पुन: उच्चारितम् । प्रधानमन्त्रिणा नरेन्द्रमोदिना भणितं यत् देश:

तेषां सर्वोच्च-बलिदानं सदैव कृताज्ञतापूर्वकं स्मरिष्यति। गृहमन्त्रिणा अमित शाहेन प्रोक्तं यत् राष्ट्रं तेषां बलिदानं सदैव स्मरणं करिष्यति।

------------------------------------------

## प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी दिसम्बर् मासस्य पञ्चदश-षोडश दिनाङ्कयोः महामहिमराज्ञः अब्दुल्ला - द्वितीयस्य बिन् – अल् - हुसैन इत्यस्य आमन्त्रणे

जोर्डन - नगरस्य हाशमाईट - साम्राज्यस्य द्विदिवसीय-यात्रायाम् भविष्यति। एषा यात्रा प्रधानमन्त्रिणः मोदिनः जोर्डन्-देशेन सह प्रथम-पूर्ण-द्वैपाक्षिक-चर्चया द्वयोः देशयोः मध्ये कूटनीतिक-सम्बन्धस्य स्थापनायाः पञ्चसप्तति-तमे वर्षे भविष्यति, तथा च नवदिल्ली-अम्मान्-देशयोः मध्ये सुस्थिर-उच्च-स्तरीय-राजनैतिक-संवादयोः मध्ये भवति।

------------------------------------------

## सीडीएस-वायुसेना अकादमी

रक्षा प्रमुख: जनरल अनिल चौहान: प्रतिपादितवान् यत् भारतीय-रक्षा-बलानि सदैव परिष्काराणां, परिवर्तित - पिरवेशानां कते सज्जीभूतानि सन्ति। हैदराबादे डिंडीगल - स्थित - वायु - सेना - अकादम्यां षोडशोत्तर-द्विशत-तमस्य दलस्य संयुक्त-दीक्षांत-पथसंचलने जनरल-चौहानेन प्रोक्तं यत् ऑपरेशन – सिंदूर-अधुनापि प्रचलति। भारतीय-सैन्य-अकादम्यां भव्य- पथसंचलने भारतीय-सेनायां युवा-अधिकारिण: समाविष्टा: सन्ति।

## मध्यप्रदेश- क्रीडा समारोह:

केन्द्रीय-मन्त्रिणा मनसुख मांडविया वर्येण अद्य उत्तराखण्डे पौड़ी-जनपदे कंडोलिया-प्राङ्गणे मध्यप्रदेश खेल-समारोह: समुद्घाटित: । युनां सम्बोधयता तेन भणितं यत् क्रीडा राष्ट्रं सुदृढ़ीकरणाय बहु-लाभकारी, महत्वपूर्णा च वर्तते। क्रीडकानां, स्थानीय-नागरिकाणां च मध्ये स्वीय-उद्गारा: अपि प्रकाशिता:। मांडविया वर्येण प्रोक्तं यत् समारोह: अयं यूनां प्रतिभां अग्रे प्रसारणाय एकं भद्रतम-मञ्चम् उपस्थापयिष्यति।

------------------------------------------

## थाईलैण्ड्-कम्बोडिया

थाईलैण्ड्-कम्बोडिया-देशयोः सीमायां युद्धं निरन्तरं प्रचलति यद्यपि अमेरिकीय राष्ट्रपतेः डोणाल्ड् ट्रम्पस्य मध्यस्थतायाः अनन्तरम् उभौ देशौ युद्धविरामाय सहमतौ आस्ताम्। पूर्वं ट्रम्पः अवदत् यत् थाय्-कम्बोडिया-देशयोः नेतारः एकसप्ताहाभ्यन्तरे सीमायाः प्राणघातक-संघर्षस्य अनन्तरं तत्क्षणमेव युद्धविराम-सन्धिं नवीकर्तुं पुनः एकवारं सम्मतौ स्तः। मलेशिया-देशस्य कुआलालंपुर-नगरे अस्मिन् वर्षे अक्टूबर्-मासे हस्ताक्षरिते मूल-शान्ति-सन्धिं प्रति प्रत्यागन्तुं उभौ नेतारौ सम्मतं कृतवान् इत्यपि सः अवोचत्।

।। इति वार्ताः ।।